॥ वाल्मीकि रामायण॥

५ सुन्दरकाण्ड

अध्याय १०

स तस्य मध्ये भवनस्य वानरो
लतागृहांश्चित्रगृहान्निशागृहान् ।
जगाम सीतां प्रति दर्शनोत्सुको
न चैव तां पश्यति चारुदर्शनाम् ॥ १॥

स चिन्तयामास ततो महाकपिः
प्रियामपश्यन्नघुनन्दनस्य ताम् ।
ध्रुवं नु सीता म्रियते यथा न मे
विचिन्वतो दर्शनमेति मैथिली ॥ २॥

सा राक्षसानां प्रवरेण बाला
स्वशीलसंरक्षण तत्परा सती ।
अनेन नूनं प्रतिदुष्टकर्मणा
हता भवेदार्यपथे परे स्थिता ॥ ३॥

विरूपरूपा विकृता विवर्चसो
महानना दीर्घविरूपदर्शनाः ।
समीक्ष्य सा राक्षसराजयोषितो
भयाद्विनष्टा जनकेश्वरात्मजा ॥ ४॥

सीतामदृष्ट्वा ह्यनवाप्य पौरुषं
विहृत्य कालं सह वानरैश् चिरम् ।
न मेऽस्ति सुग्रीवसमीपगा गतिः
सुतीक्ष्णदण्डो बलवांश्च वानरः ॥ ५॥

दृष्टमन्तःपुरं सर्वं दृष्ट्वा रावणयोषितः ।
न सीता दृश्यते साध्वी वृथा जातो मम श्रमः ॥ ६॥

किं नु मां वानराः सर्वे गतं वक्ष्यन्ति सङ्गताः ।
गत्वा तत्र त्वया वीर किं कृतं तद्वदस्व नः ॥ ७॥

अदृष्ट्वा किं प्रवक्ष्यामि तामहं जनकात्मजाम् ।
ध्रुवं प्रायमुपेष्यन्ति कालस्य व्यतिवर्तने ॥ ८॥

किं वा वक्ष्यति वृद्धश्च जाम्बवानङ्गदश्च सः ।
गतं पारं समुद्रस्य वानराश्च समागताः ॥ ९॥

अनिर्वेदः श्रियो मूलमनिर्वेदः परं सुखम् ।
भूयस्तावद्विचेष्यामि न यत्र विचयः कृतः ॥ १०॥

अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तकः ।
करोति सफलं जन्तोः कर्म यच्च करोति सः ॥ ११॥

तस्मादनिर्वेद कृतं यत्नं चेष्टेऽहमुत्तमम् ।
अदृष्टांश्च विचेष्यामि देशान्रावणपालितान् ॥ १२॥

आपानशालाविचितास्तथा पुष्पगृहाणि च ।
चित्रशालाश्च विचिता भूयः क्रीडागृहाणि च ॥ १३॥

निष्कुटान्तररथ्याश्च विमानानि च सर्वशः ।
इति सञ्चिन्त्य भूयोऽपि विचेतुमुपचक्रमे ॥ १४॥

भूमीगृहांश्चैत्यगृहान्गृहातिगृहकानपि ।
उत्पतन्निपतंश्चापि तिष्ठन्गच्छन्पुनः क्व चित् ॥ १५॥

अपावृण्वंश्च द्वाराणि कपाटान्यवघट्टयन् ।
प्रविशन्निष्पतंश्चापि प्रपतन्नुत्पतन्नपि ।
सर्वमप्यवकाशं स विचचार महाकपिः ॥ १६॥

चतुरङ्गुलमात्रोऽपि नावकाशः स विद्यते ।
रावणान्तःपुरे तस्मिन्यं कपिर्न जगाम सः ॥ १७॥

प्राकरान्तररथ्याश्च वेदिकश्चैत्यसंश्रयाः ।
स्वभ्राश्च पुष्करिण्यश्च सर्वं तेनावलोकितम् ॥ १८॥

राक्षस्यो विविधाकारा विरूपा विकृतास्तथा ।
दृष्टा हनूमता तत्र न तु सा जनकात्मजा ॥ १९॥

रूपेणाप्रतिमा लोके वरा विद्याधर स्त्रियः ।
दृटा हनूमता तत्र न तु राघवनन्दिनी ॥ २०॥

नागकन्या वरारोहाः पूर्णचन्द्रनिभाननाः ।
दृष्टा हनूमता तत्र न तु सीता सुमध्यमा ॥ २१॥

प्रमथ्य राक्षसेन्द्रेण नागकन्या बलाद्धृताः ।
दृष्टा हनूमता तत्र न सा जनकनन्दिनी ॥ २२॥

सोऽपश्यंस्तां महाबाहुः पश्यंश्चान्या वरस्त्रियः ।
विषसाद महाबाहुर्हनूमान्मारुतात्मजः ॥ २३ ॥

उद्योगं वानरेन्द्राणां प्लवनं सागरस्य च ।
व्यर्थं वीक्ष्यानिलसुतश्चिन्तां पुनरुपागमत् ॥ २४ ॥

अवतीर्य विमानाच्च हनूमान्मारुतात्मजः ।
चिन्तामुपजगामाथ शोकोपहतचेतनः ॥ २५ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com